# Shivanamaushadham

# શિવનામૌષધમ્

## Document Information

Text title : Shivanamaushadham

File name : shivanAmauShadham.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 19 | 5-15 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# શિવનામૌષધમ્

યાજ્ઞવલ્ક્યઃ -
અભિનવમિદમૌષધં જનાનાં જનનવિનાશકમેકમેવ લોકે ।
કથમપિ ગિરિશાભિધાનરૂપં શિવ શિવ સૃષ્ટમિદં મનોહરં મે ॥ ૫॥

શિવ શિવ શિવ ચાતુરી કિમેષા જનજનનામયભોગનાશનાય ।
શિવપદરચનાનુકૂલરૂપા શિવપદમેતદપૂર્વમૌષધં હિ ॥ ૬॥

રે રે જનાઃ પિબત શઙ્કરનામધેયપીયૂષરૂપમિદમૌષધમાદરેણ ।
તેનૈવ જન્મમરણાદિકરોગભોગસમ્ભાવિતોઽપિ ન ભવિષ્યતિ સર્વદાઽપિ ॥ ૭॥

અહો જનાસ્તાવદતઃ પરં નઃ સર્વાત્મના જન્મ જરા મૃતિર્વા ।
નાસ્ત્યેવ સૃષ્ટં શિવનામરૂપમભૂતપૂર્વં પરમૌષધં હિ ॥ ૮॥

શિવશઙ્કરનામરૂપમેતત્ ગિરિશેનાપિ ન સૃષ્ટમૌષધં ચેત્ ।
જરયા મરણેન પીડિતાઃ સ્યુઃ જનનેનાપિ જગત્ત્રયાન્તરસ્થાઃ ॥ ૯॥

જન્તુર્વાઞ્છતિ જન્મરોગવિલયં તત્કારણેચ્છા પરં
લોકે કસ્યચિદેવ ભૂરિતપસા પુણ્યૈરપોરૈરપિ ।
તત્તાવદ્ગિરિશાભિધાનમસકૃત્સંસેવિતં ભાગ્યતઃ
તજ્જન્માપનયં કરોતિ સકૃદપ્યાવર્તનેનાપિ કિમ્ ॥ ૧૦॥

શિવાભિધાનાભિધમૌષધં ચેત્ પીતં સકૃત્સર્વરુજાં વિનાશમ્ ।
કરોતિ તત્તુલ્યમિદં વિચિત્રં મેને ચ સર્વામયનાશ એવ ॥ ૧૧॥

શ્રુતમપિ શિવનામધેયરૂપં પરમમિહૌષધમામયપ્રવાહાન્ ।
પરિહરતિ વિચિત્રમેવમેતત્ કિમિતિ ન પીતમનામયાય લોકૈઃ ॥ ૧૨॥

સંસારામયભેષજં શ્રવણમપ્યારોગ્યહેતુઃ પરં
તત્તાવદ્ગિરિશાભિધાનમિતિ મે જિહ્વાઙ્ગણે સર્વદા ।
નૃત્યત્યાદરપૂર્વકં શિવકથાપીયૂષધારાન્વિતં તત્
કિં મે ન કરિષ્યતીતિ સકલાભીષ્ટપ્રદં તન્મમ ॥ ૧૩॥

એકેનાપિ સકૃત્ પ્રસઙ્ગવશતઃ પીતં તદેવૌષધં
શર્વાણીરમણાભિધાનમમરાન્ કર્તું પ્રવૃત્તં શ્રુતમ્ ।
તદ્વંશ્યાનખિલાંસ્તદીપ્સિતતમાન્ ભૃત્યાનપીત્યદ્ભુતં
મન્યે શઙ્કરનામરૂપમનઘં દિવ્યૌષધં દુર્લભમ્ ॥ ૧૪॥

નિરામયોઽયં ધનરાશિભિઃ સ્યાત્ પુત્રૈઃ પ્રપૌત્રૈઃ કમલાવિલાસૈઃ ।
વ્યાપ્તઃ શ્રુતેનાપિ શિવાભિધાનદિવ્યૌષધેનેતિ મતિઃ પ્રિયા મે ॥ ૧૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવનામૌષધં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૧૯। ૫-૧૫ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 19. 5-15 ..

Proofread by Ruma Dewan

*Shivanamaushadham*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*